International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 79-83
© 2025 IJMH
www.themultijournal.com

Received: 11-08-2025
Accepted: 21-08-2025
Publish : 23-08-2025

**डा. मञ्जुनाथभट्टः**
सहायकप्राध्यापकः,
कर्नाटकसंस्कृतविश्वविद्यालयः,
बेङ्गलूरु, कर्नाटकम्

**Correspondence:**
**डा. मञ्जुनाथभट्टः**
सहायकप्राध्यापकः,
कर्नाटकसंस्कृतविश्वविद्यालयः,
बेङ्गलूरु, कर्नाटकम्

# सङ्गीतसामवेदसंबन्धविमर्शः

**डा. मञ्जुनाथभट्टः**

**उपक्रमः**

श्रीमद्भगवतः जगदीश्वरस्य निःश्वासरूपेण आविर्भूतेषु चतुर्षु वेदेषु सामवेदः अन्यतमः। अत एव भगवान् श्रीकृष्णः एवम् उवाच भगवद्गीतायाम्- "वेदानां सामवेदोऽस्मि[1]" इति। सर्वात्मना श्रेयसः मार्गप्रदर्शकः स चायं वेदः "सहस्रवर्त्मा सामवेदः[2]" इत्यादिभिः वाक्यैः ऋषिभिः जेगीयमानः अपि पूर्वं सहस्रशाखाभिः समुपेतः अयं वेदः एतर्हि अध्ययनस्य परम्परायां तिसृभिः शाखाभिः सनाथीकृता इति खेदावहोऽयं विषयः। सम्प्रति उपलभ्यमानासु कौथुमी-राणायनीय-जैमिनीयशाखासु तिसृषु कौथुमी इत्याख्या शाखा अत्यन्तं प्रसिद्धा। श्रौतयज्ञकर्मणि प्रधानभूतेषु होता, अध्वर्युः उद्गाता ब्रह्मा इति ख्यातेषु चतुर्षु ऋत्विक्षु उद्गातृगणे विद्यमानाः सर्वे ऋत्विजः सामवेदवेत्तारः अथवा सामवेदिनः भवेयुरिति नियमः वर्तते। श्रौतयज्ञे प्रधानाहुतिप्रदानकाले देवतानां स्तुतिः कर्तव्या भवति। ऋग्वेदस्य मन्त्रान् समाश्रित्य अत्र उद्गातृगणे विद्यमानैः ऋत्विग्भिः आहोस्वित् उद्गात्रा गानं क्रियते। इदमेव गानं भरतीयसंगीतस्य मूलम् इत्यत्र नास्ति संशीतिलेशः। किमेतत् गानं ? किं नाम सङ्गीतम्? कीदृशः सम्बन्धः ? इत्यादिरूपेण विविधाः विचिकित्साः उत्थिताः भवन्ति।

कोऽयं सामवेदो नाम ?

सामवेदो नाम चतुर्वेदान्तर्गतः तृतीयः वेदः। वेदविशेष इति यावत्। अयं सामशब्दः "सातिभ्यां मनिन्मनिणौ[3]" इति उणादिसूत्रेण मनिन् प्रत्ययेन निष्पन्नः । स्यति छिनत्ति दुःखं गेयत्वात्, स्यति दुःखयति दुरध्येत्वात् इति वा इति अस्य व्युत्पत्तिः। ऋच्यध्यूढं साम गीयते[4] इति ब्रवीति छान्दोग्योपनिषत्। पूर्वमीमांसायाः प्रवर्तकः मुनिः जैमिनिः इत्थम् असुसूत्रत्-"गीतिषु सामाख्या"[5]। तस्यैतस्य सूत्रस्य विवरणसन्दर्भे पूर्वमीमांसाशास्त्रस्य भाष्याकार इति प्रथिताः शबरस्वामिनः **-विशिष्टा काचित् गीतिः सामेत्युच्यते[6]**" इत्यवादिषुः। विशिष्टगानरूपेण विद्यमानः मन्त्र एव साम इति तेषाम् अभिप्रायः। साम इत्यस्मिन् पदे अक्षरद्वयम् सा तथा अम इति। अत्र सा इत्यस्य ऋचा इत्यर्थः। अम इत्यस्य गानम् इत्यर्थः। एवं च ऋचा गानम् इति अस्य तात्पर्यम्। अत एव उक्तम्-बृहदारण्यकोपनिषदि- "सा च अमश्चेति तत् साम्नः सामत्वम्[7]" इति। "गीतिरूपाः मन्त्राः सामानि" इति जैमिनीयन्यायमालाविस्तरे प्रतिपादितम् साम। एवं च गातुं योग्याः स्वरैः विशिष्टाः मन्त्रा एव सामशब्देन व्यपदिष्टा भवन्तीति निर्गलितोऽर्थः। इमं सामवेदं भगवान् व्यासः स्वस्य शिष्याय जैमिनये उपदिदेश। जैमिनिः स्वपुत्रं सुमन्तुं तथा सुमन्तुः सुन्वानं एवं रीत्या एषा अध्ययनपरम्परा समागाता।

**किं नाम सङ्गीतम् ?**

'सम्' इति उपसर्गयोगेन गै शब्दे इति धातोः क्तप्रत्ययेन निष्पन्नोऽयं सङ्गीतशब्दः। "गीतं वाद्यं च नृत्यं च त्रयं सङ्गीतमुच्यते" इत्युक्तिप्रकारेण गीतं वाद्यं तथा नर्तनं एतत् त्रयं मिलित्वा सङ्गीतं भवति। अत एव प्राचीनकाले सङ्गीतकार्यक्रमे तु गायनवादनाभ्यां सह नर्तनमपि आयोज्यते स्म। साम्प्रतिके काले अपि एषा परम्परा पुनरुज्जीविता इत्यत्र नास्ति विप्रतिपत्तिः।

**सामवेदस्य स्वरूपम्**

सामवेदे प्रधानतया योन्यक्षराणि स्वीकृत्य रागानुगुण्येन तेषां पुनरावृत्तिः तथा होयि हा उ इत्यादीनां प्रक्षेपस्तथा स्तोभसंयोजनं तु सामान्यम्। भारतीयसङ्गीतपरम्परायाः सामवेद एव मूलमिति तस्य वैशिष्ट्यम्। सामवेदसंहिता तु द्विधा विभक्ता -१) पूर्वार्चिकम् २) उत्तरार्चिकम् इति। द्वयोरपि

विभागयोः ऋच एव गानहेतोः आश्रियन्ते इति दृष्टचरम्। किन्तु सामगानं तु चतुर्धा विभक्तम्-१)ग्रामगेयम् २)आरण्यकगानम् ३)ऊहगानम् ४)ऊह्यगानम् इति। एतेषु ग्रामगेयारण्यकगाने तु प्रकृतिगानरूपेण तथा ऊहगान-ऊह्यगाने तु विकृतिगानरूपेण व्यपदिश्येते। गानं तु प्रधानतया सप्तस्वरैः निष्पन्नम्। ते च स्वराः १) क्रुष्टः, २) प्रथमः ३)द्वितीयः ४)तृतीयः ५)चतुर्थः ६)मन्द्रः ७)अतिस्वार्याख्यः च। ऋग्वेदस्य तथा सामवेदस्य सम्बन्धः कथं वर्तते इति David Frawley एवं वदति-ऋग्वेदः एकं पदं चेत् सामवेदः एकः रागः। ऋग्वेदः एकं ज्ञानं चेत् सामवेदः एकः साक्षात्कारः। ऋग्वेदः पत्नी चेत् तस्या पतिस्तु सामवेद इति ऋक्साम्नोः एकः दाम्पत्यभावः परिकल्पितः[8]।

**सङ्गीतस्य प्रादुर्भावः**

वैदिकीं परम्परां यदि वयं अवलोकयामश्चेत् सामवेदे एव मन्त्राणं गायनक्रमः आसीदिति शक्यते वक्तुं निश्चप्रचम्। अत एव अयं वेदः सङ्गीतस्य मूलमिति नास्ति संशयलेशः। चतुर्षु वेदेषु ऋग्वेदे वा यजुर्वेदे वा आहोस्वित् अथर्ववेदे सप्तस्वराः नोपलभ्यन्ते। ते च स्वराः १) षड्जः, २)ऋषभः, ३) गान्धारः, ४) मध्यमः, ५) पञ्चमः, ६) धैवतः ७) निषादश्च। "निषादर्षभगान्धार-षड्जमध्यमधैवताः। पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः" इति चामरः[9]। ऋगादिषु त्रिषु वेदेषु केवलं स्वरत्रयमेव श्रोतुं शक्यते। ते च स्वराः षड्जः, ऋषभः निषादश्च। किन्तु सामवेदे तु सप्तस्वरा अपि श्रूयन्ते। नारदीयशिक्षायाम् एतेषाम् दृश्यते उल्लेखः। नाट्यशास्त्रस्य पितामहः तत्रभवान् भरतमुनिः निजनिर्मिते ग्रन्थे एवं जग्रन्थ- "सामभ्यो गीतमेव च[10]" इति। किमपि दृश्यं श्रव्यं क्रीडनकमिच्छामः इति इन्द्रादिभिः प्रार्थितः ब्रह्मा तादृशमेकं रचयामास। रचनासन्दर्भे चतुरः वेदान् ध्यात्वा ऋग्वेदात् साहित्यं, यजुर्वेदात् अभिनयकलां, सामभ्यः गीतं तथा अथर्ववेदात् रसान् स्वीचकार इति भरतमुनिः प्रास्तावीत्। "सामवेदादिदं शास्त्रं सञ्जग्राह पितामहः[11]" इति शाङ्र्गदेवः सङ्गीतरत्नाकरे वदति। वीणा इति वाद्यविशेषस्य उल्लेखः अत्यन्तं रमणीयतया ऐतरेयारण्यके समुपलभ्यते एवम्-**"अथ खल्वियं दैवी वीणा भवति तदनुकृतिरसौ मानुषी वीणा भवति, इति। यथाऽस्याः शिर एवममुष्याः शिरो यथाऽस्या उदरमेवममुष्या अम्भणं यथाऽस्यै जिह्वैवममुष्यै वादनं यथाऽस्यास्तन्त्रय एवममुष्या अङ्गुलयो यथाऽस्याः स्वरा एवममुष्याः स्वरा यथाऽस्याः स्पर्शा एवममुष्याः स्पर्शा यथा ह्येवेयं शब्दवती तर्द्मवत्येवमसौ शब्दवती तर्द्मवती यथा ह्येवेयं लोमशेन चर्मणाऽपिहिता भवत्येवमसौ लोमशेन चर्मणाऽपिहिता, इति। लोमशेन ह स्म वै चर्मणा पुरा वीणा अपिदधति, इति। स यो हैतां दैवीं वीणां वेद श्रुतवदनो भवति भूमिप्राऽस्य कीर्तिर्भवति यत्र क्वचाऽऽर्या वाचो भाषन्ते विदुरेनं तत्र,** इति[12]।

जगति समस्तं चराचरवस्तुजातं एकैकमपि एकं सङ्गीत-साक्षात्कारं विदधातीति इत्यत्र नास्ति अतिशयोक्तिः। जलतरङ्गः एकं क्रमबद्धं लयं अनुसरति चेत् वायुः कस्यचित् लयस्य दृष्टान्तः। एवं पञ्चभूतानि एकैकमपि नादाराधनं कुर्वन्तीति लोके दृष्टचरम्। पक्षिणां कलरवः, प्राणिनां ध्वनिः तथा भ्रमराणां रवः इत्येवं विविधरूपेण सङ्गीतसमाराधनं जगति भवतीति वयं सर्वेपि साक्षिभूताः। अस्माकं श्वासप्रश्वासौ, अङ्गचलनमित्या-दिरूपेण एकैकमपि एकस्य लयस्य साक्षात्कारः। एकैकोपि शब्दः जगति श्रूयमाणः सप्तस्वराणां समूह इति। इत्थं च परिसरे प्रत्येकोपि अंशः विदित्वा वा अविदित्वा वा सङ्गीतसमाराधनस्य हेतोः स्वकीयं योगदानं कुर्वन् वर्तत इति न विस्मयावहः वृत्तान्तः। इदं च भारतीयसङ्गीतं हिन्दूस्तानीसङ्गीतं तथा कर्णाटक-सङ्गीतमिति द्वेधा विभज्यते। उभयत्रापि गानप्रकारः विलक्षणः भवति। हिन्दूस्तानीसङ्गीते भातखाण्डेवर्याः फलूस्कर् प्रभृतयः सङ्गीतविषये ग्रन्थान् रचयामासुः। कर्णाटकसङ्गीतपरम्परायां पुरन्दरदासः कनकदासः ,मुत्तुस्वामिदीक्षिताः एवम् अनेके सङ्गीतक्षेत्रे अत्यन्तं स्मरणीयाः भवन्ती। रमणीयाः कृतयः तैः प्रणीताः। उभयत्रापि गायनपद्धतिः भिद्यते। हिन्दूस्तानीप्रकारे बढा ख्याल् छोटा ख्याल् रूपेण एकं साहित्यं स्वीकृत्य रागविस्तारः क्रियते। स्वरविन्यासेन सह तबला हार्मोनियं इत्यादिवाद्यानां वादनमपि भवति। कर्णाटकसङ्गीते तु एकां कृतिं स्वीकृत्य तान पल्लवि इत्यादिरूपेण मृदङ्गदिवाद्यानि उपयुज्य रागस्य विस्तारः भवति। उभयत्र विद्यमानानां केषाञ्चित् रागाणां नाम भिद्यते। यथा हिन्दुस्तानीमध्ये भूपालि रागः यः वर्तते स एव कर्णाटकसङ्गीते मोहनराग इत्युच्यते। हिन्दुस्तानीमध्ये यमन् रागः यः वर्तते स एव कर्णाटकसङ्गीते कल्याणीराग इत्युच्यते। कुत्रचित् रागाणां नाम समानं तथा रागान्तर्गतस्वराः समानाः भवन्ति। यथा हंसध्वनिरागः इत्यादयः। एवं च उभयत्र महत् वैलक्षण्यं वर्तते।

**सामवेदस्य तथा सङ्गीतस्य सम्बन्धः**

सङ्गीतसामवेदयोः अव्यभिचरितः सम्बन्धः। सामवेदात् एव सङ्गीतस्य आविर्भावो जात इति उभयोर्मध्ये जन्यजनकभावः सम्बन्धः शक्यते वक्तुम्। सामवेदे यथा पूर्वार्चिकस्य तथा उत्तरार्चिकस्य गानहेतोः उपयोगः भवति तथा सङ्गीतेपि प्रधानतया साहित्यमेकं स्वीकृत्य स्वराणां संयोजनं भवति। तादृशसाहित्यमेव हिन्दुस्तानी – परम्परायां बन्दिश् ख्याल् इत्युच्यते चेत् कर्णाट-सङ्गीतपरम्परायां कृतिः इत्युच्यते। सामवेदे यथा योन्यक्षराणि स्वीकृत्य रागानुगुण्येन तेषां पुनरावृत्तिः तथा होयि हा उ इत्यादीनां प्रक्षेपः भवति तद्वत् हिन्दुस्तानी – परम्परायां धिर् धिर् इति कर्णाटसङ्गीतपरम्परायां नों तों इति पदैः सस्वरः प्रक्षेपः भवति। इयं च पद्धतिः हिन्दुस्तानी – परम्परायां तराना इति शब्देन तथा कर्णाटसङ्गीतपरम्परायां तिल्लान इति पदेन व्यवह्रियते। सामवेदे यथा १) क्रुष्टः, २) प्रथमः ३)द्वितीयः ४)तृतीयः ५)चतुर्थः ६)मन्द्रः ७)अतिस्वार्याख्यरूपेण स्वराः प्रयुज्यन्ते तद्वत् हिन्दुस्तानीसङ्गीते तथा कर्णाटकसङ्गीते सप्तस्वराः १) षड्जः, २)ऋषभः, ३) गान्धारः, ४) मध्यमः, ५) पञ्चमः, ६) धैवतः ७) निषाद इति सप्तैव स्वराः प्रयुज्यन्ते। तर्हि एतयोः सप्तस्वरसमूहयोः भेदः कः इति विचारणीयोऽयं विषयः। अत एव प्राचीनाः सामोपयोगिस्वराणां तथा वेणुस्वराणां साम्यम् एवं प्रदर्शितवन्तः।

**स्वरसम्बन्धिनी पट्टिका**

| क्र.सं. | सामवेदस्य स्वराः | वेणुस्वराः | स्वराः |
|---|---|---|---|
| १ | प्रथमः | मध्यमः | म |
| २ | द्वितीयः | गान्धारः | ग |
| ३ | तृतीयः | ऋषभः | रे |
| ४ | चतुर्थः | षड्जः | सा |
| ५ | पञ्चमः | निषादः | नि |
| ६ | षष्ठः | धैवतः | ध |
| ७ | सप्तमः | पञ्चमः | प |

सामगाने यथा गानकरणस्य सन्दर्भे ऋचः एकस्य भागस्य त्रिवारं यथा गानं क्रियते तद्वत् सङ्गीतपरम्परायां तिहाय् इति नाम्ना काचन पद्धतिः वर्तते। सामवेदे यथा कौथुमी-राणायनीय-जैमिनीय-शाखादिरूपेण बह्व्यः शाखाः सन्ति तद्वत् भारतीय-सङ्गीत-परम्परायामपि हिन्दुस्तानी - कर्णाटकसङ्गीतरूपेण विभागः तत्रापि हिन्दुस्तानीप्रकारे जैपुर् घराणा, किराणा घराणा इत्यादिरूपेणा अवान्तरभेदः भवति। सामवेदो वा भवतु सङ्गीतं वा भवतु एतदुभयमपि गुरुशिष्यपरम्परया एव रक्षितम्। एवं च उभयोः सङ्गीतसामवेदयोः घनिष्ठः सम्बन्धः।

**सङ्गीतसामवेदयोः साम्यं वैषम्यं च ।**

सङ्गीतं तु सामवेदात् एव यद्यपि आविर्भूतं अतः किञ्चन साम्यं तथा किञ्चन वैषम्यं तु विद्यते एव। उभयोरपि साक्षात्काराय उत्तमः गुरुरपेक्षितः। सामवेदस्य अपौरुषेयत्वात् स्वराणां प्रयोगे गानकर्तुः स्वातन्त्र्यं नास्ति चेत् सङ्गीतस्य पौरुषेयत्वात् सप्तस्वराणां प्रयोगे तेषां संयोजने तत्तद्रागानुसारेण स्वातन्त्र्यं गायकस्य वा गायिकायाः विद्यते। अथ च शास्त्रदृष्ट्या साम्नः गाने केवलं पुरुष एव अधिकृतो भवति किन्तु सङ्गीतस्य तु लिङ्गभेदः नास्ति। स्त्रीपुरुषयोः समानतया सङ्गीताध्ययने अध्यापने च अधिकारः विद्यते। यथा सामवेदे गायत्रसाम, वैराजसाम, बृहत्साम, रथन्तरसाम इत्यदिरूपेण साम्नः नामानि विद्यन्ते तद्वत् सङ्गीते अपि भूपाली रागः मालकौंस् रागः, दुर्गा रागः, हंसध्वनिराग इत्यादिरूपेण रागनामानि भिद्यन्ते। अथ च तत्र प्रातः काले भैरव् रागः, गुर्जरी तोडि रागः, बिलासखानि तोडि रागः मध्याह्ने मधुवन्ति रागः पटदीप् रागः तथा प्रदोषकाले यमन् रागः, मारु बिहाग रागः इत्यादिरूपेण तत्तत्कालगेयाः रागाः हिन्दुस्तानीपरम्परायां भवन्ति। अथ च अस्मिन् ऋतौ अयं रागः इति नियमस्तु भवति। यथा श्रीकण्ठस्य रसकौमुदीग्रन्थे अस्य उल्लेखः एवं वर्तते-

**भूपालः शिशिरे वसन्तसमये गेयो वसन्तो मुदा**
**ग्रीष्मे भैरवसंज्ञको अतिसुभगो वर्षासु मेघाभिधः।**
**रागो रागविदां वरैः किल शरत्काले पुनः पञ्चमो**
**हेमन्ते च नटात्परोऽतिरुचिरो नारायणाख्यः क्रमात्**[13]॥इति।

किन्तु कर्णाटसङ्गीते अयं नियमः नास्ति। सामगानस्य तु अस्मिन् काले इदं साम गेयं इदं साम न गेयं इति नास्ति नियमः। किन्तु आरण्यकस्य तु रात्रौ निषेधः परिपाल्यते। नारदीय-शिक्षायाम् उल्लिखितः मूर्छनाप्रकारः सामागानां सम्प्रदाये कुत्रापि न दृष्टः। अस्य विषये विवरणं नोपलभ्यते। किन्तु सा च पद्धतिरासीदिति ग्रन्थाध्ययनेन ज्ञातुं शक्यते। किन्तु सङ्गीते मूर्छनापद्धतिः साम्प्रतिके कालेपि श्रोतुं शक्यते। समस्या का इत्युक्ते ये च सामगाः भवन्ति ते सङ्गीतं प्रायः न जानन्ति। ये च सङ्गीतज्ञाः भवन्ति ते साम ज्ञातुं प्रायः न प्रयतन्ते। अतः तुलनात्मकरूपेण अध्ययनं कर्तव्यं चेत् उभयोरपि परिज्ञानम् अपेक्षितम्। एवं च उभयोरपि साम्यं वैषम्यं च विद्यते।

**सामवेदस्य प्रयोजनम्**

शतपथब्राह्मणे[14] तथा गोपथब्राह्मणे[15] च एवं उल्लेखः वर्तते यत्- "सर्वेषां वा एष वेदानां रसो यत् साम" इति । इत्युक्ते सर्वेषां वेदानां साररूपेण वर्तते सामवेद इति। सामवेदं विना यज्ञकर्म सम्पादयितुं नैव शक्यते। अथ च यज्ञः अपूर्णः भवति। अत एव शतपथब्राह्मणम् एवं वक्ति-"नासामा यज्ञोस्ति[16]" इति। यजुर्वेदः अपि साम्नः महिमानं एवं ब्रूते- "साम प्राणं प्रपद्ये[17]" इति। साम्नः श्रवणात् स्वर्गीयदेवताः आनन्दतुन्दिलाः सन्तः आगच्छन्ति। यज्ञकर्मणि प्रदीयमानं हविः स्वीकुर्वन्ति। "सामानि यो वेत्ति स वेद तत्त्वम्" इत्यपि साम्नः महिमा श्रूयते। अत एव महर्षिः याज्ञवल्यः एवं प्रोवाच-

**यथा विधानेन पठन् सामगानमविच्युतम्।**
**सावधानस्तदभ्यासात् परं ब्रह्माधिगच्छति**[18]॥

परब्रह्मणः साक्षात्कार एव भवति सामगानेन इति। एवं च साम्नः न केवलं लौकिकं प्रयोजनं अपि तु अलौकिकं प्रयोजनमपि विद्यते इति अनेन ज्ञातुं शक्यते।

**सङ्गीतस्य प्रयोजनम्**

सङ्गीतं इति शब्द एव वदति यत् गीतस्य वा वाद्यस्य श्रवणेन न केवलं मानवानां न केवलं दानवानां न केवलं देवानां कृते आनन्दसन्दोहः किन्तु पशुपक्षिमृगाणां कृतेऽपि सन्तोषः सञ्जायते। अत एव उक्तम्-"शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गानरसं फणी" इति। देवतानां साक्षात्कारः कर्तव्यश्चेत् सङ्गीतं एकं अनुपमं साधनमित्यत्र नास्ति आबालगोपालाविपालानामपि विप्रतिपत्तिः। तत्रभवान्मम्मटः निज-निर्मिते काव्यप्रकाशे -

**"काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये ।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे** ॥ इति।

यथा काव्यप्रयोजनं सङ्ग्राह तद्वत् सङ्गीतस्य विषयेऽपि एवं वक्तुं शक्यते-सङ्गीतं यशसे अर्थकृते शिवेतरक्षतये सद्यः परनिर्वृतये इति। वेदेपि एवं श्रूयते सङ्गीतविदः विषये-गायन्तं स्त्रियः कामयन्ते इति। महर्षिणा याज्ञवल्क्येन एवमुक्तम्-

**वीणावादनतत्वज्ञः श्रुतिजातिविशारदः।**
**तालज्ञश्चाप्रयासेन मोक्षमार्गं च गच्छति**[19]॥ **इति।**

सङ्गीतमकरन्द इति ग्रन्थस्य कर्ता श्रीनारदः स्वनिर्मितग्रन्थे स्वरचितग्रन्थस्य निर्विघ्नपूर्वकपरिसमाप्तये स्वर्गीयदेवताविषय-कमङ्गलं विदधानः एवं ब्रूते-

**ब्रह्मा तालधरो हरिश्च पटही वीणाकरा भारती**
**वंशज्ञौ शशिभास्करौ श्रुतिधराः सिद्धाप्सराःकिन्नराः।**
**नन्दीभृङ्गिगरिटादिमर्दलधराः सङ्गीतको नारदः**
**शम्भोर्नृत्तकरस्य मङ्गलतनोः नाट्यं सदा पातु नः**[20]**॥**

अत्र ग्रन्थकारेण स्तुताः प्रस्तुताश्च देवाः कीदृशा इत्युक्ते एकैकोपि देवः केनचन वाद्यविशेषेण भूषितः। न केवलं गीतेन न वा वाद्येन अपि च नृत्तेन च आकर्षिताः देवाः इत्युक्ते सङ्गीतस्य का च आकर्षणशक्तिः स्यात्? देवता एव एवं सङ्गीतलोलुपाः चेत् किमु वक्तव्यं अस्माकं स्थितिविषये गतिविषये वा?

सङ्गीतरत्नाकरकारः एवं वदति देवतानां विषये-

**गीतेन प्रीयते देवः सर्वज्ञः पार्वतीपतिः ।**
**गोपीपतिरनन्तोपि वंशध्वनिवशंगतः॥**
**सामगीतिरतो ब्रह्मा वीणासक्ता सरस्वती।**
**किमन्ये यक्षगन्धर्वदेवदानवमानवाः॥**
**अज्ञातविषयास्वादो बालः पर्यङ्किकागतः।**
**रुदन्गीतामृतं पीत्वा हर्षोत्कर्षं प्रपद्यते॥**
**वनेचरस्तृणाहारः चित्रं मृगशिशुः पशुः।**
**लुब्धो लुब्धकसङ्गीते गीते त्यजति जीवितम्**[21]**॥** इति।

एवं च सङ्गीतं सहृदयहृदयास्वाद्यं न केवलं लोके अपि परलोके अथ च मोक्षप्राप्तावपि एकं साधनमिति निस्सन्देहसन्दोहं वक्तुं शक्यते।

**साम्प्रतिके काले सामवेदस्य स्थितिः**

सहस्रवर्त्मा सामवेद इति भगवता पतञ्जलिना कण्ठरवेण कथितमपि सम्प्रति गुरुशिष्यपरम्परया केवलं तिस्रः एव शाखाः तत्शाखाध्यायिन एव उपलभ्यन्ते। एषा तु श्रवणविद्या।

गुरुशिष्यपरम्परया गुरुमुखोच्चाराणानूच्चारणरूपम् अध्ययनं अव्याहतरूपेण गुरोः सकाशात् शिष्यं प्रति आगतमपि सहस्रसंख्याकाः शाखाः कुत्र गताः इति प्रश्नः उदेति। अध्ययनपरम्परायाः विच्छित्तिरेव तत्र कारणं स्यात्। अथवा अन्यासां शाखानां विषये संशोधनं कर्तव्यं स्यात्। कौथुमीया शाखा सम्प्रति भरतखण्डे प्रचलिता वर्तते। राणायनीया शाखा तु प्रायः दक्षिणभारते परिदृश्यते अध्ययनपरम्परायाम्। कौथुमीयशाखा तथा राणायनीयशाखा एवं उभयोः भेदः कः इत्युक्ते तावान् भेदः नास्ति। गणनापद्धतिः उभयत्र भिन्नः भवति। अध्यायरूपेण खण्डरूपेण तथा मन्त्ररूपेण कौथुमीया शाखा विभाजिता चेत् राणायनीया शाखा प्रपाठरूपेण अर्धप्रपाठरूपेण दशतिरूपेण मन्त्ररूपेण च विभक्ता वर्तते। एवं विद्यमानमपि साम केवलं शाखात्रयसमुपेतमिति खेदकरः विषयः।

**साम्प्रतिके काले सङ्गीतस्य स्थितिः**

सङ्गीतक्षेत्रं तु गुरुशिष्यपरम्परया अत्यन्तं समृद्धं वर्तते। अत्यन्तं युवानः अपि सङ्गीतेन आकर्षिताः सन्तः श्रद्धया अविरतं सङ्गीतसरस्वतीं समुपासते। नूतनाः आविष्काराः अपि सङ्गीतक्षेत्रे प्रचलन्तः सन्ति। हिन्दूस्तानीसङ्गीतं तथा कर्णाटकसङ्गीतं मेलयित्वा जुगलबन्दि इति कश्चन कार्यक्रमः सम्प्रति प्रचलति। पण्डित् जसराज महोदयेन जसरङ्गी जुगलबन्दि इति कश्चन नूत्नः प्रकारः संयोजितः। एवं च सतताध्ययनेन नूतनाविष्कारादिभिः सङ्गीतक्षेत्रं अत्यन्तं समृद्धमिति वक्तुं शक्यते।

**सङ्गीतसामवेदयोः गवेषणम् अनिवार्यं वा ?**

जन्यजनकभावरूपसम्बन्धेन यद्यपि उभौ सङ्गीतसामवेदौ सम्बन्धिनौ तथापि कथं सम्बन्धः अनयोः इति सम्यक्तया अध्ययनं युक्तियुक्तं भवेत्। उभयत्र विद्यमानानां स्वराणां विषये कूलंकषरूपेण गवेषणं विधेयम्। प्रागुक्ता मूर्छनापद्धतिः पूर्वम् आसीद्वा न वेति संशोधनं कर्तव्यम्। सा चेयं पद्धतिः आसीत् चेत् कथं लुप्ता ? अद्यतनकाले सामगाः किमर्थं न जानन्ति ? इत्यादिप्रश्नानां समाधानं प्राप्तव्यं चेत् गवेषणमवश्यं भवेदेव।

**उपसंहारः**

एवं च सङ्गीतसामवेदयोः अनन्यः सम्बन्धः। उभयोरपि अध्ययनेन सम्बन्धः अस्माभिरवगम्यते। किन्तु सङ्गीतं वा भवतु सामवेदः गुरूपदेशद्वारा यदि एतयोः अध्ययनं भवति चेत् द्वयोः साम्यं वैषम्यं च ज्ञातुं शक्यते। स्वरज्ञानं तु अपेक्षितमेव। साम्न एव इयं सङ्गीतसंस्कृतिः समासादिता । इत्थं च अस्माकं भारतीया संस्कृतिः सामवेदेन तथा सामवेदप्रादुर्भूतसङ्गीतेन च समृद्धा इत्यलं पल्लवितेन।

**उपयुक्तग्रन्थसूची**


१) अमरकोशः – अमरसिंहविरचितः श्रीभानुदीक्षितकृतया व्यख्या-सुधाख्यव्याख्यया समुपेतः। पाण्डुरङ्ग जावजीवर्येण मुम्बय्यां निर्णयसागरमुद्रणालये प्राकाश्यं नीतः। १९२९

२) काव्यप्रकाशः-मम्मटविरचितः। झळकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्यया टीकया सहितः। भण्डारकर-प्राच्यविद्या संशोधनमन्दिम् पुणे, द्वारा प्राकाश्यं नीतः। ख्रिस्ताब्दाः १९८३

३) छान्दोग्योपनिषत्-प्रतिपदार्थदीपिका प्रकाशिका-आनन्द-सुबोधिनी इति भाष्यचतुष्टयोपेता। मेलुकोटे संस्कृतसंशोधनसंसत् द्वारा प्राकाश्यं नीता। २०१२

४) जैमिनीयन्यायमाला - श्रीमाधवाचार्यप्रणीता स्वविरचितविस्तराख्य व्याख्योपेता जैमिनिसूत्रपर्यलङ्कृता च। शिवदत्तशर्मणा संशोधिता। प्रकाशकः-महादेव चिमणाजी आपटे। आनन्दाश्रम-मुद्रणालयः, पुण्यपत्तनम्। १८९२

५) जैमिनिसूत्रम्- जैमिनिमुनिभिः विरचितं मीमांसादर्शनम्। विनायक गणेश आपटे महोदयेन पुण्याख्ये पत्तने आनन्दाश्रम-मुद्रणालये मुद्रयित्वा प्राकाश्यं नीतम्। ख्रिस्ताब्दाः- १९२९

६) भगवद्गीता-भगवद्रामानुजविरचितभाष्यसहिता। एन् एस् रामभद्राचार्यैः संशोधिता। मेलुकोटे संस्कृत संशोधनसंसत् द्वारा प्राकाश्यं नीता। २००८

भगवद्गीता – आदिदेवानन्दस्वामिभिः कर्णाटभाषया अनूदिता। रामकृष्णाश्रमद्वारा प्राकाश्यं नीता। मैसूर्. १९९४

७) महाभाष्यम्-महर्षिपतञ्जलिविरचितं भाष्यप्रदीपोद्योतसमुपेतम्। श्री भार्गव शास्त्री जोशीमहाभागेन संशोधितम्। चौखम्बासंस्कृत-प्रतिष्ठानद्वारा प्रकाशितम्। २०१४

८) याज्ञवल्क्यस्मृतिः-विज्ञानेश्वरविरचितमिताक्षराख्यव्याख्यास-हिता। सन्तुरामात्मजसुन्दरमल खेडवाल इत्यनेन मुम्बय्यां श्रीवेङ्कटेश्वरमुद्रणयन्त्रालये मुद्रापिता। १९००
९) शाबरभाष्यम्-जैमिनिमुनिप्रणीतं मीमांसादर्शनम्। विनायक गणेश आपटे महोदयेन पुण्याख्यपत्तने आनन्दाश्रममुद्रणालये आयसाक्षरैः मुद्रयित्वा प्रकाशितम्। ख्रिस्ताब्दाः- १९२९
१०)सङ्गीतमकरन्दः-श्रीनारदविरचितः। मङ्गेश-रामकृष्ण तेल-ङ्गद्वारा संसोधितः। केन्द्रीय-ग्रन्थालय, बरोडा, द्वारा प्रकाशितः। १९२०
११)सङ्गीतरत्नाकरः- शार्ङ्देवविरचितः। मङ्गल रामकृष्ण तेलङ्ग इत्येतैः संशोधितः। हरि नारायण आपटे महोदयेन पुण्याख्यपत्तने आनन्दाश्रममुद्रणालये मुद्रयित्वा प्रकाशितः। १८९७
सामवेदसंहिता- भगवता सायणाचार्येण विरचितभाष्येण सहिता। वङ्गसामगेन श्रीसत्यव्रतसामश्रमिभट्टाचार्येण शोधिता। मुनिशीराम मनोहरलाल पब्लिशर्स नवदेहली
१२)A Vedic Concordance -by Maurice Bloomfield. Published by Motilal Banarasidas Private Limited, Delhi.

**संदर्भः**

[1] भगवद्गीता-१०. २२
[2] महाभाष्यम्- पस्पशान्हिकम्
[3] उणादिसूत्रम्-४. १५३
[4] छान्दोग्योपनिषत्-१. ६. १.
[5] जै.सू.२. १. ३६.
[6] पू.मी.-२. १. ३७
[7] बृहदारण्यकोपनिषत्-१. ३. २२
[8] If the Rigveda is the word, Samaveda is the song or meaning If Rigveda is the knowledge, Samaveda is its realization, If Rigveda is the wife, the Samaveda is her husband- David Frawley
[9] अमरकोषः
[10]नाट्यशास्त्रम्- १. १८
[11]सङ्गीतरत्नाकरः- १. २५
[12]ऐतरेयारण्यकम्-आ. ३. अ. २. ख. ५
[13]रसकौमुदी- २. १७४
[14]श.प.ब्रा. १२. ८. ३. २३.
[15]गो.ब्रा. २.५.७
[16]श.प.ब्रा. १.४.१.१.
[17]यजु. ३६.१.
[18]याज्ञवल्क्यस्मृतिः-यतिधर्मप्रकरणम्- ११२
[19]याज्ञवल्क्यस्मृतिः
[20]सङ्गीतमकरन्दः- १. २.
[21]सङ्गीतरत्नाकरः - २६-२९